# AMRITA VIDYALAYAM
## HALF YEARLY EXAMINATION 2018 - '19

**Class : X** **Marks : 80**
**Time : 3 hrs**

# संस्कृतम्

निर्देशा:
1. प्रश्नपत्रे चत्वार: खण्डा: सन्ति।
खण्ड: क अपठित अवबोधनम् - 10 अङ्का:
खण्ड: ख रचनात्मककार्यम् - 15 अङ्का:
खण्ड: ग अनुप्रयुक्त व्याकरणम् - 25 अङ्का:
खण्ड: घ पठित अवबोधनम् - 30 अङ्का:
2. सर्वे प्रश्ना: अनिवार्या:।
3. प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।
4. प्रश्नसंख्या अवश्यमेव लेखनीया।
5. उत्तराणि संस्कृतेनैव लेखनीयानि।

## खण्ड: क (अपठित अवबोधनम्)

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

क्रोध: मनुष्यस्य महान् शत्रु:। क्रुद्ध: जन: गुरून् अपि निन्दति, अपभाषणं करोति, ज्येष्ठानां हितवचनानि अपि न श्रृणोति। तस्माद् वयं क्रोधात् सावधाना: भवेम। यदि क्रोध: आगच्छति तदा तस्मिन्नेव क्षणे मौनं धारणीयम्। मौनेन मन: शान्तं भवति। वाणी अपि नियन्त्रिता भावति। ईदृशे काले किञ्चित् पुस्तकं गृहीत्वा पठेम। कोपात् सर्वदा आत्मानं रक्षेम। गीतायामपि कथितम् -
क्रोधाद् भवति सम्मोह: सम्मोहात् - स्मृतिविभ्रम:।
स्मृतिभ्रंशाद् बुद्धिनाशो, बुद्धिनाशात् प्रणश्यति।
अर्थात् मानवस्य नाशस्य मूलकारणं क्रोध: एव वर्तते। अत: जनै: सर्वदा क्रोधं त्यक्त्वा एव कार्यं कर्तव्यम्।
तदैव तेषां कल्याणं भविष्यति।

**I. एकपदेन उत्तरत।** 2

क. क्रुद्ध: जन: केषां हितवचनानि अपि न श्रृणोति?
ख. क्रोधे आगते किं धारणीयम्?
ग. मौनेन किं शान्तं भवति?
घ. मौनेन वाणी कीदृशी भवति?

**II. पूर्णवाक्येन उत्तरत।** 4

क. मनुष्यस्य महान् शत्रु: क:?

ख. कोपात् सर्वदा किम् रक्षेम?

**III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत।** **2**

क. किञ्चित् इति कस्य पदस्य विशेषणम्?
(गृहस्य, जनस्य, मनुष्यस्य, पुस्तकस्य)

ख. असावधाना: इति पदस्य किं विलोमपदम्?
(सावधाना:, सतर्का:, सन्नद्धा:, सवितर्का:)

ग. 'भवेम' इति क्रियापदस्य कर्तृपदं किम्?
(तस्माद्, वयम्, त्वम्, आवाम्)

घ. 'सर्वस्मिन् काले' इति स्थाने किम् अव्ययपदम् अत्र प्रयुक्तम्?
(सर्वदा, एव, अपि, यदि)

**IV. अस्य अनुच्छेदस्य कृते उचितं शीर्षकं लिखत।** **2**

## खण्डः ख (रचनात्मक कार्यम्)

**2. भवान् सौरभः। भवतां विद्यालये वार्षिकोत्सवे संस्कृतनाटकस्य मञ्चनं भविष्यति। तदर्थं स्वमित्रं गौरवं प्रति लिखितं निमन्त्रणपत्रं मञ्जूषापदसहायतया पूरयित्वा पुनः उत्तरपुस्तिकायां लिखत।** **5**

मञ्जूषा
(द्रष्टुम्, दिल्लीतः, सर्वगतं, प्रणामाञ्जलि:, कुशली, मञ्चनम्, गौरव, दीपावल्या:, करिष्यामि, सौरभः)

सर्वोदयविद्यालयः
क. ---------।
तिथि ----------

प्रिय मित्र ख. ----------
दीपावलिपर्वणः शुभाशंसाः। अत्र ग. ------ कुशलम्। भवान् अपि घ. -------- इति मन्ये। अस्माकं विद्यालस्य वार्षिकोत्सवः ङ. --------- पर्वणः शुभावसरे भविष्यति। तत्र अस्माकं पुस्तकस्य 'रमणीया हि सृष्टिः एषा' इति नाटकस्य च. ------- भविष्यति। अहं तस्मिन् नाटके काकस्य अभिनयं छ. --------।
भवान् अवश्यमेव तत् ज. ---------- आगच्छतु। मम अपि उत्साहवर्धनम् भविष्यति। सर्वेभ्यः अग्रजेभ्यः मम झ. ---------- निवेद्यताम् इति।

भवदीयः वयस्यः
ञ. -----------

**3. 'मम प्रियकविः' इति विषयम् अधिकृत्य मञ्जूषापद - साहाय्येन पञ्च संस्कृत वाक्यानि लिखत।** **10**

मञ्जूषा
(कालिदासः, कवीनां, उपमा, अलंकारस्य, अद्वितीय, संस्कृतस्य, प्रकृतिवर्णनम्, अभिज्ञान शाकुन्तलम्)

अथवा

**मञ्जूषायां प्रदत्त शब्दानां सहायतया चित्रं दृष्ट्वा पञ्च वाक्यानि संस्कृतेन लिखत।**

मञ्जूषा

(रेलस्थानकम्, इतस्ततः, प्रसन्नाः, स्वच्छता, पदाति जनाः, उत्सुकाः, नराः)




## खण्डः ग (अनुप्रयुक्त व्याकरणम्)

**4. अधोलिखित वाक्येषु रेखाङ्कितपदेषु सन्धि सन्धिच्छेदं वा कृत्वा लिखत।** 6

क. कीटोऽपि सुमनः संगादारोहति सतां शिरः।

ख. रामः + च लक्ष्मणश्च वनं गतौ।

ग. पापिनाञ्च सदा दुःखम्।

घ. सुभाषितानि नरं सत् + मार्गं दर्शयन्ति।

ङ. अस्य नाटकस्य नै + अकः कः अस्ति?

च. अश्वाः प्राणत्राणाय इतस्ततः अधावन्।

**5. अधोलिखित वाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्त विकल्पेभ्यः चित्वा लिखत।** 6

क. न अनृतं ब्रूयात्।
(अनु + क्त, ऋत + न, न + ऋतम्)

ख. सः एकं बालकं कूपपतितम् अपश्यत्।
(कूपे पतितम्, कूप पतितम्, कूपं पतितम्)

ग. सः महान् पुरुषः आसीत्।
(महापुरुषः, महत्पुरुषः, महापुरुषाः)

घ. जलम् ददाति इति -----------।
(जलजम्, जलम्, जलदः)

ङ. न विवेके: परमापदां पदम्।
(अविवेकी, विवके:, अविवेक:)

च. बालका: क्रीडाक्षेत्रे क्रीडन्ति।
(क्रीडयाक्षेत्रे, क्रीडाया: क्षेत्रे, क्रीडायाम् क्षेत्रे)

**6. अधोलिखित वाक्येषु रेखाङ्क्तिपदानां प्रकृतिप्रत्ययं संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्य: चित्वा लिखत।** **5**

क. बल + मतुप् हि आशा।
(बलवान्, बलवत्, बलवती)

ख. पुस्तकेषु किमपि न लेखनीयम्।
(लिख् + मतुप्, लिख् + अनीयर्, लिख् + तव्यत्)

ग. नमन्ति फल + इन् वृक्षा:।
(फलिना:, फली, फलिन:)

घ. मनुष्य: सामाजिक: प्राणी अस्ति।
(समाज + ठक्, सामाज : ठक्, समाज + इन्)

ङ. जनै: सौन्दर्यमयी सृष्टि: दूषिता न कर्तव्या।
(कृ + अनीयर्, कृ + मतुप्, कृ + तव्यत्)

**7. अधोलिखितेषु वाक्येषु विकल्पेभ्य: उचितम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयत।** **5**

क. अस्माकं जीवनं वृक्षान् ---------- असम्भवम्।
(एव, इव, विना)

ख. कोलाहलं ----------- कुरुत।
(अत्र, मा, अधुना)

ग. वानरा: --------- भ्रमन्ति।
(तदा, इतस्तत:, अद्य)

घ. सर्प: कोटरात् --------- आगच्छति।
(अत्र, एव, बहि:)

ङ. कच्छप: -------- चलति।
(अन्यत्र, शनै: शनै:, यदा-तदा)

**8. अधोलिखित संवादं मञ्जूषायां प्रदत्तै: शब्दै: वाच्यपरिवर्तनं कृत्वा पूरयित्वा च पुन: लिखत।** **3**

मञ्जूषा
(भानुना, पठ्यते, गृहम्)

आचार्य: - वत्स! किम् त्वम् गीतां पठसि?
छात्र: - आम् मया गीता क. -------
आचार्य: - किम् भानु: पत्रं लिखति।

छात्रः - आम् ख. ---------- पत्रं लिख्यते।

आचार्यः - किं भृत्यः गृहं गच्छति?

छात्रः - आं भृत्येन ग. -------- गम्यते।

## खण्डः घ (पठित अवबोधनम्)

**9. अधोलिखितं गद्यांशं, पद्यं, नाट्यांशं च पठित्वा प्रदत्त प्रश्नानां उत्तराणि संस्कृतेन लिखत।**

**अ. गद्यांशः**

अथ एकस्मिन् अहनि स मेषो यावत् महानसं प्रविशति तावत् सूपकारेण अर्धज्वलितकाष्ठेन ताडितः। ऊर्णप्रचुरः मेषः वह्निना जाज्वल्यमानशरीरः निकटस्थाम् अश्वशालां प्रविशति दाहवेदनया च भूमौ लुठति। तस्य भूमौ प्रलुठतः तृणेषु वह्निज्वोलाः समुत्थिताः। ज्वालामालाकुलाः अश्वाः प्राणत्राणाय इतस्ततः अधावन्। तेषु केचिद् अर्धदग्धाः केचन च पञ्चत्वं गताः।

**I. एकपदेन उत्तरत।** 2

क. अश्वाः प्राणत्राणाय कुत्र अधावन्?

ख. दाहवेदनया मेषः भूमौ किं करोति?

**II. पूर्णवाक्येन उत्तरत।** 2

क. यदा मेषः भूमौ अलुठत् तदा किम् अभवत्?

**III. प्रदत्त विकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत।** 2

क. 'दिने' अस्य पर्यायपदं गद्यांशात् चित्वा लिखत।
(दिवसे, अहनि, एकस्मिन्, भूमौ)

ख. तेषु केचिद् दग्धाः। अत्र क्रियापदं किम्?
(के, केचिद्, तेषु, दग्धाः)

ग. तस्य भूमौ प्रलुठतं अत्र 'तस्य' इति सर्वनाम पदस्य विभक्तिः किम्?
(द्वितीय, षष्ठी, तृतीया, चतुर्थी)

घ. 'केचन पञ्चत्वं गताः' अत्र कर्तृपदं किम्?
(केचन, गताः, गतः, पञ्चत्वं)

**आ. पद्यम्**

भगवीन्कमुपादेयम्? गुरुवचनं, हेयमपि च किम्? अकार्यम्।
को गुरुः? अधिगततत्वः शिष्यहितायोद्यतः सततम् ॥

**I. एकपदेन उत्तरत।** 2

क. हेयम् किम्?

ख. अत्र किम् सम्बोधनपदम्?

**II. पूर्णवाक्येन उत्तरत।** 2

गुरुः कः कथ्यते?

**III. प्रदत्तविकल्पेभ्यः उचितं पदं चित्वा लिखत।** **2**

क. 'निरन्तरम्' इत्यर्थे श्लोके किं पदं प्रयुक्तम्?

(सततम्, उद्यतः, अकार्यम्, हेयम्)

ख. 'तत्परः' इति पदस्य अत्र किम् पर्यायं प्रयुक्तम्?

(अधिगततत्वः, हेयम्, उद्यतः, अधिगतः)

ग. 'उपादेयम्' इति पदस्य विलोमपदं अत्र किम्?

(सततम्, हेयम्, अकार्यम्, तत्वः)

घ. शिष्यहितायोद्यतः इति पदस्य सन्धिविच्छेदं कृत्वा लिखत।

शिष्यहिताय + उद्यतः, शिष्यहितायो + उद्यतः, शिष्यहिताय + ओद्यतः,

शिष्य हिताय + ओद्यतः)

**इ. नाटयांशः**

शक्रः - राजन्। भवतः दानवीरताम् आकर्ण्य आशान्वितः भवत्समीपम् आगतोऽस्मि देव। रवि-शशि तारा-मण्डलभूषितं जगत् एतत् कथमिव पश्येयम् चक्षुर्हीनः।

राजा - भगवन्! भवन्मनोश्थं पूरयित्वा आत्मानम् अनुगृहीतं कर्तुम् इच्छामि। आदिश्यताम्, किं करवाणि?

शक्रः - यदि भवान् प्रीतः, तदा त्वक्त्तः एकस्य चक्षुषः दानम् इच्छामि येन मम लोकयात्रा निर्बाधा भवेत्।

राजा - भो मित्र! किम् एकेन चक्षुषा, अहं भवते चक्षुर्द्वयमव प्रयच्छामि।

**I. एकपदेन उत्तरत।** **2**

क. का निर्बाधा भवेत्?

ख. अहं भवते चक्षुर्द्वयमेव प्रयच्छामि इति कः अवदत्?

**II. पूर्णवाक्येन उत्तरत।** **2**

राजा कम् अनुगृहीतं कर्तुम् इच्छामि?

**III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत।** **2**

क. 'प्रयच्छामि' अत्र क्रियापदस्य कर्तृपदम् किम्?

(भवते, अहम्, चक्षुर्द्वयम, एव)

ख. श्रुत्वा इति अर्थे अत्र किम् पदं प्रयुक्तम्?

(प्रीतः, आकर्ण्य, विचार्य, पूरयित्वा)

ग. 'तारामण्डलभूषितं जगत्' अनयोः पदयोः विशेषणपदं किम्?

(जगत्, जगतं, तारामण्डल भूषितं, भूषितं)

घ. नृपः इत्यर्थे अत्र किं पदम् प्रयुक्तम्?

(शक्रः, चक्षुः, राजा, विप्रः)

**10. रेखाङि्कत पदानि आधृत्य प्रश्ननिर्माणं कुरुत।** **4**

क. बोधिसत्वः <u>शिवीनां</u> राजा बभूव।

ख. <u>षट्</u> पाठक गुणाः सन्ति।

ग. <u>मनसः</u> निग्राहः वायोः इव कठिनः।

घ. साधुजनमैत्री सुखदा भवति।

**11. मञ्जूषातः समुचितं पदं चित्वा अधोलिखित श्लोकयोः अन्वयं पूरयत। 4**

मञ्जूषा

(प्रमाथि, मनः, निग्रहं, चक्षुः, सुदुष्करम्, सत्यसमम्, त्यागसमम्, दुःखं)

क. नास्ति विद्यासमं चक्षुः नास्ति सत्यसमं तपः।
नास्ति रागसमं दुःखं नास्ति त्यागसमं सुखम् ॥

अन्वयः - विद्यासमं 1. --------- न अस्ति, 2. -------- तपः न अस्ति।
रागसमम् 3. -------- न अस्ति, 4. ------- सुखम् न अस्ति।

ख. चञ्चलं हि मनः कृष्ण। प्रमाथि बलवद्दृढम्।
तस्याहं निग्रहं मन्ये वायोरिवसुदुष्करम् ॥

अन्वयः - कृष्ण! 1. ------- हि चञ्चलम् 2. ------ बलवद् दृढम् (चास्ति)
अहम् तस्य 3. -------- वायोः इव 4. ---------- मन्ये।

**12. रेखाङ्कितपदानां प्रसङ्गानुसारम् उचितम् अर्थं चित्वा लिखित। 4**

क. शुश्रूषा चैव ग्रहणं धारणं तथा।
(सेवा, श्रोतुम् इच्छा, श्वश्रुः)

ख. बुद्धिनाशात् प्रणश्यति।
(विनश्यति, प्रभवति, जायते)

ग. तस्य पुरतः देवराजः शक्रः उपस्थितः।
(विप्रः, इन्द्रः, राजा)

घ. आमरणात् किम् शल्यम् प्रच्छन्नं कृतं पापम्।
(मृत्युः, कण्टकम्, बहुमूल्यम्)